मम पुस्तकम्


नाम – _____

पत्रसङ्केतः – _____

_____

चल-दूरवाणी-सङ्ख्या – _____


पत्रालयः
मुरारि-जनपदः
पत्रम्



वार्तालापाय

१. अस्मिन् चित्रे स्वस्य अभिप्रायं कथयितुं केषां माध्यमानाम् उपयोगः कृतः अस्ति ?

२. भवान्/भवती कदापि पत्रालयं गतवान्/गतवती ?

३. भवान्/भवती कानि कार्याणि कर्तुं पत्रालयं गच्छति ?

४. सन्देशाः केन केन माध्यमेन प्राप्ताः भवन्ति ?

५. वार्तालापं विहाय दूरवाण्याः प्रयोगः केषु केषु कार्येषु भवति ?

२ संवादः

वयं ज्ञास्यामः


इ	ई	ब	त	म	ख	ट	च

- १० तः २० पर्यन्तं संख्यानां परिचयम्।
- पठनं लेखनं च।
- २० पर्यन्त-सङ्ख्यानां सङ्कलनं व्यवकलनं च।

■ वयं चित्रं दृष्ट्वा पठामः -



वार्तापत्रम्



मञ्चः



बन्धु-चर्चा



चलदूरवाणी



खेलवार्ता



परिचर्चा



लेखनी



टङ्कणयन्त्रम्



पत्रपेटिका

शिक्षक-निर्देशः — सहभागिनः सर्वेषां चित्राणां परिचयं कारयन्तु । चित्रं दृष्ट्वा शब्दानाम् उच्चैः उच्चारणं कारयन्तु । सहभागिनः उच्चैः उच्चारणं कर्तुं प्रेरयन्तु । चित्राणाम् अधः लिखितानां शब्दानाम् उपरि अङ्गुलीं संस्थाप्य पाठयन्तु ।

■ वयं चित्रं दृष्ट्वा पठामः -

भवतः/भवत्याः गृहे परिवेशे वा एतेषु केषाम् उपयोगः भवति ? (✓) इति चिह्नं योजयतु -





आकाशवाणी

दूरदर्शनम्





सङ्क्षिप्त-सन्देश-सेवा (एस.एम.एस.)

दूरभाषः

■ पठामः लिखामः च -

इ



इन्धनम्



इक्षुः

ई



ईशः



'ई' - पत्रम् (ई-मेल)

ब



बस-यानम्



बकः

बा



बालाः



बाला

बि



बिल्वपत्रम्



बिडालः

बी



बीजम्



बीजपूरम्

शिक्षक-निर्देशः — चित्रं दृष्ट्वा शब्दानां पठने सहभागिनां सहयोगं कृत्वा वर्णानां लेखनस्य अभ्यासं कारयन्तु। प्रदत्तेषु स्थलेषु चित्राणां नामानि लेखयन्तु।

त



तण्डुलः



तडागः



ता




ताम्बूलम्



तालः

ति



तिलकम्



तित्तिरः

ती



तीर्थम्




तीर्थङ्करः

म



मर्दनम्



मकरः

मा




माता



माला

मि




मिष्टान्नम्



मित्रम्

मी




मीनः



मीरा

ख



खट्वा



खनित्रम्

खा




खाद्यम्



खादति

ख



शिखिपुच्छम्



खिन्नः

ख

खी



ज्वालामुखी



सखी

खी

ट



नटराजः



टङ्कणम्

टा



घण्टा


१८

अष्टादश

टि



टिट्टिभः



यष्टिः

टी



टीकाग्रन्थः



टीकाकरणम्

च




चषकः



चमसः

च

चा



चालनी




चापम्

चा


चि



चिकित्सिका




चिबुकम्



ची



चीत्कारः



चीरम्



विद्यालयाय पत्रम्

आदरणीये शिक्षिके ...

नमस्कारः,

मम पुत्री रमा भवत्याः विद्यालये नवमकक्षायां पठति । पारिवारिक-कारणात् वयं मासद्वयस्य कृते ग्रामं गतवन्तः आस्म । वयम् अधुना एव ग्रामात् आगतवन्तः, किन्तु विद्यालयेन रमायाः प्रवेशः निरस्तः । मम निवेदनम् अस्ति यत् विद्यालये रमायाः पुनः पञ्जीकरणं करोतु इति ।

धन्यवादः

रमायाः माता



शिक्षक-निर्देशः — उपरि दत्तं पत्रं पठित्वा सहभागिनः श्रावयन्तु । तैः सह अस्मिन् विषये चर्चां कुर्वन्तु यत् किं भवतां/भवतीनां कृते कदापि पत्रलेखनस्य आवश्यकता अभवत् ? इति । अग्रे दत्तानां प्रश्नानाम् अधः अङ्गुलीं संस्थाप्य पठन्तु एवञ्च सहभागिनः 'आम्' अथवा 'न' इत्यत्र (✓) इति चिह्नं योजयितुं कथयन्तु ।

■ पठन्तु बोधयन्तु च -

प्रश्नः १. किं भवतां/भवतीनां कृते कदाचित् पत्रलेखनस्य आवश्यकता अभवत् ? आम् ☐ न ☐

प्रश्नः २. किं भवतः/भवत्याः गृहसमीपे पत्रपेटिका अथवा पत्रालयः अस्ति ? आम् ☐ न ☐

प्रश्नः ३. किं भवान्/भवती कदापि पत्रालयं गतवान्/गतवती ? आम् ☐ न ☐

प्रश्नः ४. किं पत्रालये भवतः/भवत्याः धनसंरक्षणकोषः अस्ति ? आम् ☐ न ☐

■ पश्यामः, पठामः लिखामः च –

यस्य पदस्य आदौ **'इ'** इति वर्णः अस्ति तादृशं पदं चित्वा लिखन्तु -

समिधा पक्षी इष्टिका सर्पः

यस्य पदस्य आदौ **'ई'** इति वर्णः अस्ति तादृशं पदं चित्वा लिखन्तु -

तपस्वी आश्रमः नदी ईशानः

यस्य पदस्य आदौ **'ख'** इति वर्णः अस्ति तादृशं पदं चित्वा लिखन्तु -

नखः खगः आखेटः अक्षरम्

यस्य पदस्य आदौ **'मी'** इति वर्णः अस्ति तादृशं पदं चित्वा लिखन्तु –

मन्दिरम् महर्षिः मीनः चमसः

यस्य पदस्य आदौ **'आ'** इति वर्णः अस्ति तादृशं पदं चित्वा लिखन्तु -

आयुः अष्ट वसुधा शिला

यस्य पदस्य आदौ **'च'** इति वर्णः अस्ति तादृशं पदं चित्वा लिखन्तु -

चन्दनम् मरिचम् तनयः नखः

यस्य पदस्य आदौ **'स'** इति वर्णः अस्ति तादृशं पदं चित्वा लिखन्तु -

शाला पुष्पम् मांसम् सप्ताहः

यस्य पदस्य आदौ **'ना'** इति वर्णः अस्ति तादृशं पदं चित्वा लिखन्तु -

अनामिका नेत्रम् नासिका नलिका

यस्य पदस्य आदौ **'टि'** इति वर्णः अस्ति तादृशं पदं चित्वा लिखन्तु -

टिट्टिभः यष्टिः टीका घण्टा

यस्य पदस्य आदौ **'ता'** इति अस्ति तादृशं पदं चित्वा लिखन्तु -

तालः तिस्रः तीरम् तल्पः

■ मम रुचिकरं कार्यम्

शिक्षक-निर्देशः— शब्दानां पठने सहभागिनां सहयोगं कुर्वन्तु । येषां ध्वनिः पृथक्-पृथक् अस्ति, तादृशानां शब्दानां लेखितुं कथयन्तु । एषः ध्वनिः शब्दस्य आदौ मध्ये अन्ते वा भवितुं शक्नोति । सहभागिनः अक्षरस्य परिचयपूर्वकं तेन सह सम्बद्धानां शब्दानां च परिचयं कृत्वा लेखनार्थं प्रेरयन्तु ।

■ आयान्तु, गणनां जानीमः





अस्मिन् धनपत्रके ‘5’ कति-वारं मुद्रितम् अस्ति, चिह्नं कृत्वा लिखन्तु -





अस्मिन् धनपत्रके ‘10’ कति-वारं मुद्रितम् अस्ति, चिह्नं कृत्वा लिखन्तु -

■ आयान्तु, मिलित्वा गणनां कुर्मः




दश नलिकाः १०




एकादश खट्वाः ११


शिक्षक-निर्देशः — सहभागिनः प्रेरयन्तु यत् ते धनपत्रकाणाम् अग्रे पृष्ठे च लिखितानाम् अङ्कानां परिचयं स्वयं कुर्युः, एवञ्च चित्रे प्रदत्तानां वस्तूनां संख्यायाः गणनाम् अपि स्वयम् एव कुर्युः । यदि तेषाम् इच्छा अस्ति तर्हि ते स्वस्य समीपे विद्यमानानां वस्तूनाम् अपि गणनां कृत्वा लेखितुं शक्नुवन्ति ।




द्वादश पत्राणि १२




त्रयोदश कपाटिकाः १३



चतुर्दश पक्षिणः १४




पञ्चदश रक्षासूत्राणि १५




षोडश नारिकेलानि १६




सप्तदश दाडिमानि १७



अष्टादश मीनाः १८



नवदश मौक्तिकानि १९



विंशतिः अग्निशलाकाः २०

■ **सङ्गीतायाः परिवारे पञ्चजनाः सन्ति । अद्य अन्ये चत्वारः जनाः अपि तस्याः गृहम् आगताः सन्ति। कथयन्तु यत् संगीतायाः गृहे अधुना कति जनाः सन्ति ?**



तथा



आहत्य



५ जनाः तथा ४ जनाः आहत्य अभवन् ९ जनाः


५ + ४ आहत्य अभवन् ९

५ + ४ = ९


५ + ४ = ९

शिक्षक-निर्देशः — चित्राणां सहयोगेन सहभागिनां कृते गणनायाः अवसरं प्रयच्छन्तु, येन ते १० तः २० पर्यन्तं संख्याः ज्ञातुं शक्नुयुः। गणिते चिह्नानां नामानि ' +' सङ्कलनम्। '-' व्यवकलनम्। '×' गुणनम्। '÷' भाजनम्। '=' समम्।


■ नव सङ्गणकेषु द्वे सङ्गणके कार्यं न कुरुतः, अधुना वदन्तु कति सङ्गणकानि कार्यं कुर्वन्ति ?



सङ्गणकेषु



द्वे सङ्गणके कार्यं न कुरुतः




सङ्गणकानि कार्यं कुर्वन्ति ।

९	सङ्गणकेषु -	२	सङ्गणके कार्यं = न कुरुतः ।	७	सङ्गणकानि कार्यं कुर्वन्ति ।
९	–	२	=	७	अवशिष्टाः
९	–	२	=	७	

९ – २ = ७

शिक्षक-निर्देशः — दैनिक-जीवने एतादृशाः अवसराः आयान्ति, यदा द्वयोः सङ्ख्ययोः योजनं (+) करणीयं भवति । सहभागिनां प्रोत्साहनं कुर्वन्तु, येन ते सङ्ख्यानां योजनं कर्तुं शक्नुयुः । ९ सङ्ख्या-पर्यन्तं व्यवकलनम् (-) अपि कर्तुं शक्नुयुः ।



- एकस्य आपणिकस्य पार्श्वे एका उद्योगसंस्था १८ चलदूरवाणी-पेटिकाः प्रेषितवती । आपणिकः तासु ६ पेटिकाः अन्यस्य आपणिकस्य पार्श्वे प्रेषितवान् । अधुना आपणिकस्य पार्श्वे कति पेटिकाः अवशिष्टाः सन्ति ?

उत्तरम् _____



- पत्रवाहकः प्रथमे दिने ८ पत्राणि वितीर्णवान् । द्वितीये दिवसे सः ३ पत्राणि वितीर्णवान् । पत्रवाहकः आहत्य कति पत्राणि वितीर्णवान् ?

उत्तरम् _____


- पत्रवाहकस्य पार्श्वे आहत्य १५ पत्राणि सन्ति । सायङ्कालपर्यन्तं सः सर्वेषां पत्राणां वितरणं कृतवान् । अधुना पत्रवाहकस्य पार्श्वे कति पत्राणि अवशिष्टानि ?

उत्तरम् _____

- सुखदेवस्य पार्श्वे विंशतिः (२०) रूप्यकाणि सन्ति । सः १५ रूप्यकैः फलं क्रीतवान् । अधुना सः कति रूप्यकाणि व्ययं कुर्यात् येन तस्य पार्श्वे एकम् अपि रूप्यकं शेषं न भवेत् ?

उत्तरम् _____

■ गणकयन्त्रे लिखितान् अङ्कान् पश्यन्तु । एतादृशं सङ्ख्याद्वयं लिखन्तु ययोः योगः (+) १० भवेत् ।



यथा–

१	+	९	=	१०
	+		=	१०
	+		=	१०
	+		=	१०

■ मम शब्दाः

शिक्षक-निर्देशः — 'वार्तालापः' इति अस्मिन् विषये सहभागिभिः सह वार्तालापं कुर्वन्तु । सहभागिनः पृष्ट्वा अस्मिन् विषये ३/४ शब्दान् लिखन्तु । एते शब्दाः अन्य-भाषायाः अपि भवितुं शक्नुवन्ति, यथा- ध्वनिवर्धकस्य कृते 'लाउड्स्पीकर' इति यन्त्रम् । दूरभाषः, पत्रम् इत्यादयः एतानि वार्तालापस्य मुख्यानि साधनानि सन्ति, अतः अस्मिन् विषये चर्चा करणीया ।

■ मिलित्वा पठामः

अयम् 'अंधेरनगरी' इति नाटकस्य अनूदितः भागः अस्ति । अस्य नाटकस्य लेखकः भारतेन्दुः हरिश्चन्द्रः अस्ति । यदा सः इदं नाटकं लिखितवान् तदा वस्तूनां मापनार्थं 'किलोपरिमितम्' 'ग्रामपरिमितम्' परिमाणानां स्थाने सेटकं पणकं इत्यादीनाम् उपयोगः भवति स्म, तथैव क्रेतुं विक्रेतुं च रूप्यकाणां स्थाने पणस्य टङ्कस्य वा उपयोगः भवति स्म ।

'अंधेर'नगरी, 'चौपट'राजा, टङ्कसेटकं शाकम्, टङ्कसेटकं खाजा



आपणिकः गोधूमचूर्णं, द्वि-दलं, लवणं, घृतम्, उपस्करं तण्डुलं च क्रीणन्तु । टङ्कसेटकम्, टङ्कसेटकम् ।

(गोवर्धनदासः खाद्यान्नस्य आपणं गत्वा वस्तूनां मूल्यं पृच्छति ।)

गोवर्धनदासः — भोः भ्रातः ! गोधूमचूर्णस्य मूल्यं किम् ?

आपणिकः — टङ्कसेटकम् ।

गोवर्धनदासः — पुनश्च तण्डुलाः ?

आपणिकः — टङ्कसेटकम् ।



गोवर्धनदासः — शर्करा ?

आपणिकः — टङ्कसेटकम् ।

गोवर्धनदासः — घृतम् ?

आपणिकः — टङ्कसेटकम् ।

गोवर्धनदासः — सर्वं टङ्कसेटकम् । सत्यं वा !

आपणिकः — आम् । सत्यम् एतत् भोः । किमर्थम् असत्यं वदिष्यामि ।

(ततः गोवर्धनदासः शाकविक्रेत्र्याः पार्श्वं गत्वा पृच्छति ।)

गोवर्धनदासः — भोः मातः ! शाकस्य मूल्यं किम् ?

शाकविक्रेत्री — भोः साधो ! टङ्कसेटकम् । कोशातकी, मूलकम्, धान्यकम्, मरीचिका, शाकं सर्वं टङ्कसेटकम् ।

गोवर्धनदासः — सर्वं शाकं टङ्कसेटकम् ! अहो! महान् आनन्दः । अत्र तु सर्वम् अपि टङ्कसेटकम् अस्ति ।

(पाचकस्य पार्श्वं गत्वा)

हे पाचक! मिष्टान्नं कति-सेटकम् ।

पाचकः — भोः साधोः! मोदकानि, कुण्डलिकाः, रसगोलकं, खाजा सर्वम् अपि टङ्कसेटकम्।

गोवर्धनदासः — अहो! महान् आनन्दः। किं भोः ! परिहासं करोति वा, अथवा सत्यम् एतत् यत् अत्र तु सर्वम् अपि टङ्कसेटकम् अस्ति !

पाचकः — सत्यम् एव एतत् प्रभो ! अत्र सर्वम् अपि टङ्कसेटकम् अस्ति। अस्याः नगर्याः एषः एव नियमः, यत् अत्र सर्वस्य वस्तुनः मूल्यं टङ्कसेटकम् एव अस्ति।

गोवर्धनदासः — अयि भोः वत्स ! अस्याः नगर्याः नाम किम् ?

पाचकः — 'अंधेरनगरी' इति।

गोवर्धनदासः — अस्याः नगर्याः राजा ?

पाचकः — 'चौपट-राजा' इति।

गोवर्धनदासः — अहो! अद्भुतम्

'अंधेर'नगरी 'चौपट'राजा,
टङ्कसेटकं शाकम्,
टङ्कसेटकं खाजा



- भारतेन्दुः हरिश्चन्द्रः

अनुवादकः – डॉ. मनमोहनः

शिक्षक-निर्देशः — इमं संवादं पठित्वा श्रावयन्तु। शिक्षकः सहभागिनः च मिलित्वा नाटकस्य मञ्चनं कुर्वन्तु, अथवा क्रमशः संवादान् पठन्तु।